# संस्कृत-वार्ता:

दिनाङ्क : 11/02/2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- सर्वकारः लोकसभायां राहुलगांधिनं विरुध्य केन्द्रीयायव्ययप्रपत्रम् अधिकृत्य चर्चाविधौ उदीरितान् मिथ्यारोपान् विरुध्य प्रिविलेज-नोटिस इति सञ्चेनां प्रख्यापयिष्यति ।
- संसदः द्वयोः सदनयोः केन्द्रीयायव्ययप्रपत्रे चर्चा अभवत् ; LJP दलस्य अरुणभारती इत्येषः प्रपत्रं दूरगामिनम् प्रख्यापयन् अकथयत् यत् सप्तचत्वारिंशदुत्तर-द्विसहस्रतमाब्दपर्यन्तं अनेन विकसित-भारतस्य आधारः प्रतिष्ठापयिष्यते ।
- निर्वाचनायोगः अस्य मासस्य एकविंशति-दिनाङ्के गोवानिर्वाचनस्य अन्तिमसूचिं प्रकाशयिष्यति ।
- इज्रैलदेशस्य प्रधानमंत्री बेंजामिननेतन्याहू अद्य वाशिंगटनगरे अमेरिकायाः राष्ट्रपतिना डोनाल्डट्रंपः इत्यनेन सह मेलनं विधास्यति ।
- आई.सी.सी. क्रिकेट-विश्व-चषक-स्पर्धायां अस्ट्रेलिया-दलेन-आयरलैण्ड दलस्य सम्मुखे त्र्यशीति अधिकैकशत धावनांकनां लक्ष्यं स्थापितम्। इत: पूर्वं दक्षिण अफ्रीका दलेन अहमदाबाद-नगरे सुपर-ओवर इत्यस्मिन् अफगानिस्तानदलं पराजितम्।

---

<u>भाजपा-कॉन्ग्रेस्</u>

भाजपेति दलम् अद्य प्रधानमन्त्रिणं नरेन्द्रमोदिनं विरुध्य प्रख्यापितान् मिथ्यारोपान् अधिकृत्य कॉङ्ग्रेस्-दलस्य नेता राहुलगान्धी इत्यस्य आलोचनाम् अकरोत् । नवदिल्ल्यां वार्ताहरान् सम्बोधयन् भाजपादलस्य राष्ट्रियप्रवक्ता सुधांशुत्रिवेदी इत्यसौ राहुलगान्धिनः अमर्यादितभाषणस्य आलोचनां कुर्वन् अकथयत् यत् तस्य कुराजनीत्याचरणेन संसदः गरिमामयी प्रतिष्ठा निम्नस्तरे गता अस्ति । सः पुनः अकथयत् यत् संसदः पीठेन तस्मै सञ्चेतना अपि दत्ता परं तदापि सः मिथ्यारोपान् अपशब्दान् च प्रख्यापयत् । सर्वकारः लोकसभायां राहुलगांधिनं

विरुध्य केन्द्रीयायव्ययप्रपत्रम् अधिकृत्य चर्चावधौ उदीरितान् मिथ्यारोपान् विरुध्य प्रिविलेज-नोटिस इति सञ्ज्ञेनां प्रख्यापयिष्यति ।

---

## लोकसभा-केन्द्रीयायव्ययप्रपत्रम्

लोकसभायां आगामिसत्रस्य बजट इति आयव्ययप्रपत्रम् अधिकृत्य पुनः चर्चा समारब्धा । अवधेयं यत् केन्द्रीय-वित्त-मन्त्री निर्मलासीतारमणवर्या अस्य मासस्य प्रथमे दिनाङ्के संसदि केन्द्रीय-आयव्ययप्रपत्रम् उपस्थापितवती । चर्चायां भागं स्वीकृत्य, एल्. जे. पी. इति दलस्य अरुण-भारती इत्यनेन केन्द्रीय-आयव्ययप्रपत्रं राष्ट्रविकासरूपेण वर्णितम् । सः अकथयत् यत् एतत् आयव्ययप्रपत्रं सप्तचत्वारिंशदुत्तर-द्विसहस्रतमाब्दपर्यन्तं विकसितभारतस्य लक्ष्यं साधयितुम् आधारस्तंभं प्रतिष्ठापयिष्यति । आम-आदमी-पार्टीति दलस्य सांसद: डा. राजकुमारचब्बेवालः आरोपितवान् यत् देशस्य जनानां कृते केन्द्रीय-आयव्ययप्रपत्रे किमपि सुदृढं नास्ति । सः अवदत् यत्, राष्ट्रिय-स्वास्थ्याभियानम् इत्यस्य कृते देयराशिः अस्मिन् आयव्ययप्रपत्रे न्यूनीकृता अस्ति । बी. जे. पी. दलस्य सुधीरगुप्ता इत्येषः केन्द्रीय-आयव्ययप्रपत्रस्य प्रशंसां कुर्वन्, एतत् आयव्ययप्रपत्रं सप्तचत्वारिंशदुत्तर-द्विसहस्रतमाब्दपर्यन्तं विकसितभारतस्य निर्माणाय सङ्कल्परूपेण प्रत्यपादयत् । लोकसभायां विपक्षस्य नेता राहुलगान्धी अवदत् यत्, केन्द्रीय-आयव्ययप्रपत्रे किमपि दृढं नास्ति । सः अवदत् यत्, आयव्ययप्रपत्रम् आर्टिफिसियल्-इन्टेलिजेन्स् इति विषये केन्द्रितम् अस्ति, तथा च आई. टी. क्षेत्रेषु अभियान्त्रिक्याः क्षेत्रेषु च अनेन बहवः उद्योगाः बाधिताः भविष्यन्ति ।

---

## किरेन रिजिजूः-

संसदीयकार्यमन्त्री किरेनरिजिजूः इत्यसौ लोकसभायाम् आरोपं प्रख्यापितवान् यत् विपक्षनेतृणा राहुलगान्धिना राष्ट्रियसुरक्षाविषयस्य प्रयोगः सभायां राजनैतिकोपकरणरूपेण कृतः अस्ति । सः अवदत् यत् राष्ट्रिय-सुरक्षा देशस्य कृते अत्यन्तं महत्त्वपूर्णः विषयः अस्ति सहैव सः गान्धी-वर्यं

प्रार्थयत् यत् राजनैतिक-लाभार्थं एतादृशान् विषयान् न उत्थापयेत् । लोकसभायाः अध्यक्षस्य निष्कासनविषयिकीसूचनायाः विषये टिप्पणीं कुर्वन् श्रीरिजिजुः अवदत् यत् एतादृशानां विषयाणां निराकरणार्थं सभायां सुस्थापिताः नियमाः प्रक्रियाः च सन्ति।

-----------------------------------------------------------------

## निर्वाचनायोगः-गोवा

निर्वाचनायोगेन अद्य उक्तं यत् मतदातृ-सूच्यां वर्तमानस्य विशेष-गहन-संशोधनस्य (एस्. आई. आर.) इत्यस्य अंश-रूपेण गोवाराज्यस्य अन्तिम-मतदातृ-सूच्याः प्रसारणम् अस्य मासस्य एकविंशति दिनाङ्के भविष्यति। राज्यस्य मुख्य-निर्वाचन-अधिकारिणम् उद्दिश्य लिखिते पत्रे, आयोगेन गोवा-राज्ये मतदातृ-सूच्यां विशेष-गहन-संशोधनम् अनुमोदितम्, यस्य अर्हता-दिनाङ्कः अस्यैव वर्षस्य जनवरी प्रथमः दिनांकः आसीत्।

-----------------------------------------------------------------

## शिवराजः

केन्द्रीय-ग्रामीण-विकास-कृषि-कृषक-कल्याण-मन्त्री शिवराजसिंह-चौहानः अद्य केन्द्रीय-आयव्ययप्रपत्रम् ऐतिहासिकं भविष्योन्मुखं च इति अवोचत्, येन राष्ट्रस्य पूर्वोत्तरक्षेत्रस्य च कृते महत्त्वपूर्णं परिवर्तनम् आनीयते । अद्य गुवाहटी-नगरे प्रसारमाध्यमैः सह वार्तालापं कुर्वन्, केन्द्रीयमन्त्री अवदत् यत् केन्द्रीय-आयव्ययप्रपत्रे असम-राज्यं सम्पूर्णं पूर्वोत्तरं च प्रमुख-विकास-तन्त्रे परिवर्तयितुम् अप्रतिमं वित्तप्रबन्धनं कृतम् अस्ति ।

-----------------------------------------------------------------

## लोकसभा-वैष्णवः

रेलमंत्री अश्विनी वैष्णवः अवदत् यत् षड्विंशत्यधिक द्विसहस्र-सप्तविंशत्यधिक द्विसहस्र तमवर्षयोः केन्द्रीय-आयव्ययके पश्चिमबङ्गालस्य कृते पञ्चोत्तर-द्विशताधिक-चतुर्दशसहस्र-कोटिरूप्यकाणां वृहत रेल-आयव्ययकस्य अंशस्य प्रबंधनं कृतम् अस्ति। सः अवदत् यत् नवोत्तर-द्विसहस्रतः चतुर्दशाधिक-द्विसहस्रवर्ष-पर्यन्तं यू. पी. ए इति दलस्य शासनकाले राज्यस्य रेल्-

व्ययः केवलं त्रिचत्वारिंशत्सहस्र कोटिरूप्यकाणि एव आसीत्। लोकसभायां प्रश्न-काले उत्तरं प्रददता श्री वैष्णवेन सूचितं यत् पश्चिमवङ्गप्रदेशे रेल्-परियोजनानां कृते प्रायः सार्द्ध चतुःसहस्र-हेक्टर-मितायाः भूमेः आवश्यकता अस्ति, यासु अद्यावधि केवलं सप्तविंशति प्रतिशतं यावत् एव भूमिः अधिग्रहीता अस्ति। महाराष्ट्रस्य विषये मन्त्रिणा उक्तं यत् रेल्-मार्गाणां विकासकार्याणि व्यापकरूपेण द्रुतगत्या च प्रचलन्ति तथा च सम्प्रति राज्ये पञ्चाशदधिकैकलक्ष-कोटिरूप्यकाणां रेल्-परियोजनायाः कार्याणि प्रचलन्ति।

---------------------------------------------------------------

## उपराष्ट्रपतिः-दीनदयालः

उपराष्ट्रपतिः सी. पी. राधाकृष्णन्, प्रधानमन्त्री नरेन्द्रमोदी, गृहमन्त्री अमितशाहः, लोकसभाध्यक्षः ओम बिरला वर्यः च पण्डित दीनदयाळ उपाध्याय वर्यस्य पुण्यतिथ्यावसरे श्रद्धाकुसुमानि समर्पितवन्तः। सामाजिकान्तर्जालीये पटले लिखिते सन्देशे उपराष्ट्रपतिः पण्डित-दीनदयाळ-उपाध्याय-वर्यं दूरदर्शी चिन्तकः राष्ट्रनिर्माता चेति उक्तवान्, येन समाजसेवायै स्वस्य जीवनं समर्पितम्। अन्यस्मिन् सामाजिकान्तर्जालीये पटले लिखिते सन्देशे प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत् पण्डित् दीनदयाळ-उपाध्याय-वर्यस्य सिद्धान्ताः विचाराः च मूल्येषु निहितानि सन्ति, देशस्य प्रत्येकस्य जनस्य कृते मार्गदर्शक-ज्योतिः इव तिष्ठति।

---------------------------------------------------------------

## दिल्ली-उच्चन्यायालयः

दिल्ली-उच्चन्यायालयेन अद्य राष्ट्रिय-राजधान्यां लुप्तानां जनानां प्रकरणे सार्वजनिक-हित-याचिकायां दिल्ली-आरक्षकाणां कृते सञ्चेतना प्रसारिता अस्ति। संक्षिप्त-विचारणावधौ दिल्ली-न्यायालयः अवदत् यत् दिल्ली-नगरे लुप्तानां जनानां विषये अधुनापि प्रसारमाध्यमेषु भिन्नं भिन्नं वार्ताःप्रचलन्ति, अपि च अधिकारिणां प्रतिक्रियां प्राप्य तथ्यात्मकस्थितिं परीक्षितुं च उक्तवान्। दिल्ली-उच्चन्यायालये पी. आई. एल. इत्यस्मिन् पुनः विचारं फरवरी मासस्य अष्टादश दिनाङ्के भविष्यति।

------------------------------------------------------------------

**इज़राइल-अमेरिका**

इज्रैलदेशस्य प्रधानमंत्री बेंजामिननेतन्याहू अद्य वाशिंगटनगरे अमेरिकायाः राष्ट्रपतिना डोनाल्डट्रंपः इत्यनेन सह मेलनं विधास्यति ।

------------------------------------------------------------------

**हॉकी-क्रीडा**

हाकीति क्रीडायां भारतम् अद्य सायङ्काले राउरकेला-नगरस्य बिरसा मुण्डा-अन्ताराष्ट्रिय-हाकी-क्रीडाङ्गणे एफ्. आई. एच्. प्रो-लीग्-इत्यभियाने बेल्जियम-देशस्य विरुद्धं क्रीडिष्यति। क्रीडायाः आरम्भः सायं सार्द्ध-सप्तवादने भविष्यति।

------------------------------------------------------------------

**क्रिकेट**

पुरुषाणां आई.सी.सी. विंशतिं प्रति विंशति क्रिकेट-विश्व-चषक-स्पर्धायां आस्ट्रेलिया-आयरलैण्ड-दलयो: मध्ये क्रीडा प्रचलति। अस्ट्रेलिया-दलेन-आयरलैण्ड दलस्य सम्मुखे त्र्यशीति अधिकैकशत धावनांकनां लक्ष्यं स्थापितम्। इत: पूर्वं दक्षिण अफ्रीका दलेन अहमदाबाद-नगरे सुपर-ओवर इत्यस्मिन् अफगानिस्तानदलं पराजितम्।

।। इति वार्ता: ।।